# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 7 | गुणाः – ५० |
| विषयः – धर्मशास्त्रम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – विदुरनीतिः १-८ अध्यायाः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ द्वयोः पद्ययोः ससन्दर्भप्रसङ्गं व्याख्या कार्या ।**

१ जाग्रतो दह्यमानस्य श्रेयो यदनुपश्यसि ।
तद् ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि ॥

२ धर्मेण राज्यं विन्देत धर्मेण परिपालयेत् ।
धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ॥

३ मद्यपानं कलहं पूगवैरं भार्यापत्योरन्तरं ज्ञातिभेदम् ।
राजद्विष्टं स्त्रीपुंसयोर्विवादं वर्ज्यान्याहुर्यश्च पन्थाः प्रदुष्टः ॥

**प्रश्नः २ षड्दोषाः षड्गुणाः षड्सुखानि यथाग्रन्थं वर्णयत ।**

**प्रश्नः ३ महात्माविदुरस्य परिचयो लेख्यः ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः व्याख्या कार्या ।**

१ यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥

२ सन्तापाद् भ्रश्यते रूपं सन्तापाद् भ्रश्यते बलम् ।
सन्तापाद् भ्रश्यते ज्ञानं सन्तापाद् व्याधिमृच्छति ॥

३ आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥

**प्रश्नः ५ विदुरनीतिः भारतीयपरम्परायाः महिमापूर्णः ग्रन्थः वर्तते, विषयेऽस्मिन् स्वविचारान् प्रकटयत ।**

**प्रश्नः ६ मानवहिताय साधारणधर्मः यथाग्रन्थं लिखत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः व्याख्या कार्या ।**

१ नष्टं समुद्रे पतितं नष्टं वाक्यमशृण्वति ।
अनात्मनि श्रुतं नष्टं नष्टं हुतमनग्निकम् ॥

२ तपोबलं तापसानां ब्रह्म ब्रह्मविदां बलम् ।
हिंसा बलमसाधूनां क्षमा गुणवतां बलम् ॥

३ नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥

**प्रश्नः ८ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः किं किं सम्प्रवर्धन्ते ? कया रीत्या ? वर्णयत ।**

**प्रश्नः ९ धृतराष्ट्रस्य चरित्रचित्रणं क्रियताम् ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ कः विजितेन्द्रियः ?
२ मुहूर्तमनवेक्षणात् के विनश्यन्ति ?
३ के अष्टमार्गाः धर्मस्य ?
४ प्रच्छन्नपापानां शास्ता कः ?
५ के अवध्याः ?
६ प्रथमाध्याये कति श्लोकाः सन्ति ?
७ विदुरनीतिः कस्मिन् पर्वणि आगच्छति ?
८ के द्वे कर्मणी नरः विरोचते ?
९ महाबलीराज्ञैः के चत्वारः वर्ज्याः ?
१० के अष्टौ गुणाः पुरुषं दीपयन्ति ?
११ कानि दश स्वर्गस्य साधनानि ?
१२ कानि सतां गृहे नोच्छिद्यन्ते ?
१३ ज्ञानेन्द्रियाणि कति सन्ति ?
१४ पुरुषार्थाः कति सन्ति ?
१५ तृतीयाध्याये कति श्लोकाः सन्ति ?

****